St Claret College LIBRARY Bangalore-560013

NP – 027

I Semester B.B.A. Examination, May 2022
(NEP) (2021 – 22 and Onwards)
LANGUAGE SAMSKRUTHA – I
Raghuvamsham – VII Canto, Grammar and Comprehension

Time : 2½ Hours Max. Marks : 60

***Instructions :*** *1) Answer either in **Samskrit/Kannada/English**.*
*2) Answer Q. **I**, **VI** and **VII** in **Samskrit** only.*

I. समीचीनम् उत्तरं लिखत। **(1×8=8)**

ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Select and write the correct answer.

1) रघुवंशस्य रचयिता कः ?
अ) भासः आ) कालिदासः इ) बाणः ई) भोजः

2) का आत्मप्रतिरूपमेव गता ?
अ) इन्दुमती आ) पार्वती इ) सुदक्षिणा ई) लता

3) स्वयंवरे कस्याः सन्निधिः आसीत् ?
अ) ऊर्वश्याः आ) मेनकायाः इ) शच्याः ई) रम्भायाः

4) अजः कस्य पुत्रः ?
अ) भोजस्य आ) इन्द्रस्य इ) रामस्य ई) रघोः

5) पद्मा नारायणम् इव इन्दुमती कं लेभे ?
अ) अजम् आ) भोजम् इ) इन्द्रम् ई) गन्धर्वम्

6) इन्दुमती कुत्र लाजविसर्गं चकार ?
अ) जले आ) अग्नौ इ) भूमौ ई) आकाशे

7) कुण्डिनेशः कः ?
अ) अजः आ) रघुः इ) दिलीपः ई) भोजः

8) अजः द्विषतां शिरोभिः कां तस्तार ?
अ) नदीम् आ) गृहम् इ) गाम् ई) आकाशम्

P.T.O.

II. **एकस्य** प्रश्नस्य उत्तरं लिखत। **(1×8=8)**
ಯಾವುದಾದರೂ **ಒಂದು** ಪ್ರಶ್ನೆಗೆ ಉತ್ತರಿಸಿ.
Answer **any one** of the following questions.

1) कालिदासस्य देश-काल-कृती: अधिकृत्य लिखत।
ಕಾಳಿದಾಸನ ದೇಶ, ಕಾಲ ಮತ್ತು ಕೃತಿಗಳನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.
Write the place, date and works of Kalidasa.

2) अज इन्दुमत्यो: विवाह विधिं वर्णयत।
ಅಜ ಮತ್ತು ಇಂದುಮತಿಯರ ವಿವಾಹ ವಿಧಿ-ವಿಧಾನಗಳ ಕುರಿತು ಬರೆಯಿರಿ.
Describe the marriage rituals at Aja and Indumathi.

III. **द्वयो:** लघुटिप्पणी लिखत। **(2×4=8)**
**ಎರಡು** ವಿಷಯಗಳನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.
Write short notes on **any two** of the following.

1) अज:।
2) राजगण:।
3) पुरसुन्दर्य:।
4) कालिदासस्य वैशिष्ट्यम्।

IV. **चतुर्णां** श्लोकानाम् अनुवादं कृत्वा विवृणुत। **(4×3=12)**
ಯಾವುದಾದರೂ **ನಾಲ್ಕು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಸಹಿತ ವಿವರಿಸಿರಿ.
Translate and explain **any four** shlokas.

1) अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम्।
स्वसारमादाय विदर्भनाथ: पुरप्रवेशाभिमुखो बभूव।।

2) विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसंन्निकर्षं ययौ शलाकामपरा वहन्ती।

3) परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन्द्वये रूपविधानयत्न: पत्यु: प्रजानां वितथोऽभविष्यत्।।

4) हस्तेन हस्तं परिगृह्य वध्वा: स राजसूनु: सुतरां चकासे।
अनन्तराशोकलताप्रवालं प्राप्येव चूत: प्रतिपल्लवेन।।

5) इति स्वसुर्भोजकुलप्रदीप: सम्पाद्य पाणिग्रहणं स राजा।
महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्री:।।

6) रथो रथाङ्गध्वनिना विजज्ञे विलोलघण्टाक्वणितेन नाग:।
स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोध:।।

V. ससन्दर्भं विवृणुत। (**द्वयोः**) **(2×3=6)**

ಯಾವುದಾದರೂ **ಎರಡು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Annotate **any two** of the following.

1) करेण रूद्धोऽपि च केशपाशः।
2) मनो हि जन्मान्तरसङ्गतिज्ञम्।
3) तुल्यप्रतिद्वन्द्वि बभूव युद्धम्।
4) रराज मृत्योरिव पानभूमिः।

VI. **संस्कृत** भाषया उत्तरं लिखत। **(5×1=5)**

अ) **पञ्चानां** वाक्यरचनां कुरुत।

1) अजः
2) मम
3) मानवस्य
4) अद्य
5) उद्यानम्
6) नगरे
7) देशः
8) करोमि

आ) **पञ्चानां** लिङ्ग-विभक्ति-वचनानि लिखत। **(5×1=5)**

1) भोजः
2) रामाय
3) रथे
4) युद्धम्
5) पाठात्
6) मानवस्य
7) देवसेनाम्
8) हस्तेन

VII. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। **(4×2=8)**

ययातिः चन्द्रवंशजस्य नहुषस्य पुत्रः। ययातेः सुन्दर्यौ उभे पत्न्यौ। तयोः शर्मिष्ठा ययातेः प्रियतमा। सा वृषपर्वनामकस्य दैत्यराजस्य पुत्री। अपरा देवयानी शुक्राचार्यस्य पुत्री। देवयानी ययातेः न तथा प्रिया। एवमेव कश्चन कालः अतीतः। तयोः उभौ पुत्रौ जातौ। शर्मिष्ठायाः पुत्रः पूरुः। देवयान्याः पुत्रःयदुः।

**प्रश्नाः**

1) ययातिः कस्य पुत्रः ?

2) ययातेः का प्रियतमा ?

3) देवयानी कस्य पुत्री ?

4) पूरुः कस्याः पुत्रः ?